# Suryakritam Narayana Stotram

# सूर्यकृतं नारायणस्तोत्रम्

## Document Information

Text title : Suryakritam Narayana Stotram

File name : sUryakRRitaMnArAyaNastotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 42/29-45||

Latest update : December 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

December 13, 2025

*sanskritdocuments.org*

# सूर्यकृतं नारायणस्तोत्रम्

ॐ नमः तेजःप्रसवित्रे बृहतेऽव्ययतेजसे ।
तेजस्विभ्योऽव्ययतेजःप्रदात्रे ब्रह्मणे नमः ॥ २९॥

यस्य गावो भूरिशृङ्गा अयासो भान्ति वर्षणे ।
ईशनीषु तदीशेषु यस्य भ्राज्योऽन्वयं ययुः ॥ ३०॥

नमो भ्राजिष्णवे तस्मै गोमते गोप्रसारिणे ।
हृत्तमोद्राविणे दिव्यासाय देवाय ते नमः ॥ ३१॥

प्रकाशयितृसंराजे स्वप्रकाशकृणे नमः ।
नमो भावित्तिविप्राय ज्ञानप्रबोधसूरिणे ॥ ३२॥

नमः श्राणविधातस्ते नम आत्मसदात्मने ।
नमो राजिष्णवे दीव्यन् सप्तभाजनुदायिने ॥ ३३॥

नमो भौमाय रक्ताय नमो दिव्याय विद्युते ।
नमः सूर्याय चोग्राय नमो हिरण्मयाय ते ॥ ३४॥

नमः खानेयसद्धेम्ने नम उदर्यतेजसे ।
नम उडुपभावाय नमो यावत्प्रभात्मने ॥ ३५॥

नमः कार्यस्वरूपाय नमः कारणरूपिणे ।
हिरण्मयाय देवाय ब्रह्मणे परमात्मने ॥ ३६॥

त्वं स्रष्टा त्वं पोषयिता संहर्ताऽपि त्वमेव वै ।
त्वमेव परमं तेजस्तेजस्विनां दृगग्रजम् ॥ ३७॥

सदा तेजःप्रदानेन रक्ष मां परमेश्वर ।
चक्षुष्मन्तश्च यावन्तो भजिष्यन्ति प्रभाप्रभुम् ॥ ३८॥

त्वमेव भगवान् भावान् प्रभावाँश्च प्रभास्वरः ।
त्वमेव नेत्रवान् त्राताऽऽमत्राता चाऽवनीश्वरः ॥ ३९॥

महश्चक्षुः स्वर्गचक्षुर्भुवश्चक्षुस्त्वमेव हि ।
भौमचक्षुः सर्वचक्षुश्चक्षुषां चक्षुषे नमः ॥ ४० ॥

ॐ ॐ ॐ भूर्भुवः स्वस्तत् ॐ तत्सवितुर्वरेण्यम् ।
भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥ ४१ ॥

इति मन्त्रं तु यः कोऽपि जपेद्ध्यायेदतन्द्रितः ।
हिरण्मयः परो देवः साक्षाद्याति तदग्रतः ॥ ४२ ॥

अयुतं जपनात्तस्य स्वयं सूर्यो महान्प्रभुः ।
वरदो भवते तस्य भगवत्त्वं ददाति च ॥ ४३ ॥

दिव्यं करोति तच्चक्षुरुद्घाटयति चान्तरम् ।
उत्तेजयति चात्मानं सम्पादयति ब्रह्म तत् ॥ ४४ ॥

तस्माद्ध्यानपरो भूत्वा जपेत्स्वश्रेयसे सदा ।
स्तोत्रं सूर्यकृतं स्वोपास्त्यर्थं हिरण्मयस्य वै ॥ ४५ ॥

इति श्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने ४२-अध्यायान्तर्गतं सूर्यकृतं नारायणस्तोत्रं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड १। अध्याय ४२/२९-४५॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 42/29-45..

Proofread by PSA Easwaran

*Suryakritam Narayana Stotram*

pdf was typeset on December 13, 2025

Please send corrections to *sanskrit@cheerful.com*